सारथिना सह बहिर्निर्गत्य भ्रमितुमारब्धवान्। ततश्चतुर्दिक्षु प्रकृतिभिस्तारस्वरैर्जयोऽस्य प्राघोषि। नगरं वीक्ष्यासौ मनसि परां मुदं प्राप्तवान्।

अथ स जरया जर्ज्जरतनुं मानवमेकं दृष्टवान्। इतः प्राक् कदाचिदपि स शाक्यसिंहो जगतो दुःखं नानुभूतवान् इदानीं निरीक्ष्य प्रथमं तं जराग्रस्तं विवरणमस्य विज्ञातुं कुतूहली सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष दुर्ब्बल अल्पस्थाम
उच्छुष्कमांस रुधिरत्वचस्नायुनद्धः।
श्वेतशिरो विरलदन्तकृशाङ्गरूप
आलम्ब्य दण्ड व्रजतेऽसुखं स्खलन्त॥

सारथिराह।

एषो हि देव! पुरुषो जरयाभिभूतः
क्षीणेन्द्रियः सुदुःखितो बलवीर्य्यहीनो।
बन्धुजनेन परिभूत अनाथभूतः
कार्य्यासमर्थ अपविद्ध वनेव दारुः॥

बोधिसत्त्व आह।

कुलधर्म्म एष अयमस्य हितं भणाहि
अथवापि सर्व्वजगतोऽस्य ह्यवस्था।
शीघ्रं भणाहि वचनं यथभूतमेत-
च्छ्रुत्वा तथार्थमिह योनि सचिन्तयिष्ये।

सारथिराह।

नैतस्य देव! कुलधर्म्म न राष्ट्रधर्म्मः
सर्व्वे जगस्य जरयौवनधर्षयाति।
तुभ्यंपि मातृपितृबान्धवज्ञातिसंघो
जरया अमुक्तं न हि अन्यगतिर्जनस्य॥"

बोधिसत्त्व आह।

धिक् सारथे! अबुधबालजनस्य बुद्धि-
र्यद्यौवनेन मदत्त जरां न पश्यी।
आवर्त्तयाश्विह रथं पुनरहं प्रवेक्ष्ये
किं मह्य क्रीड़रतिभिर्जरयाश्रितस्य॥"

इति ललितविस्तरे १४ अध्याये।

अथ शाक्यसिंहः सारथिं सन्दिदेश रथं सञ्चालयेति। गत्वा नगरस्य दक्षिणे द्वारि व्याधिग्रस्तं यातनापरीतपुरुषमेकमीक्षाञ्चक्रे। ततः स सारथिं पप्रच्छ। तदुक्तं यथा,—

"किं सारथे! पुरुष रूपविवर्णगात्रः
सर्व्वेन्द्रियेभि विकलो गुरु प्रश्वसन्तः।
सर्व्वाङ्गशुष्क उदराकुल प्राप्तकृच्छ्रा
मूत्रे पुरीष स्वकि तिष्ठति कुत्सनीये॥"

सारथिराह।

एषो हि देवपुरुषः परमं गिलानो
व्याधीभयं उपगतो मरणान्तप्राप्तः।
आरोग्यतेजरहितो बलविप्रहीनो
अत्राणवीप्रशरणो ह्यपरायणश्च॥"

बोधिसत्त्व आह।

"आरोग्यता च भवते यथ स्वप्नक्रीड़ा
व्याधिभयञ्च इम ईदृश घोररूपम्।
को नाम विज्ञपुरुषो इम दृष्ट्व वस्थां
क्रीड़ारतिञ्च जनयेच्छुभसंज्ञिता वा॥"

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य रथवरं पुनरपि पुरवरे प्राविशत्।

इति हि भिक्षवो बोधिसत्त्वोऽपरेण कालसमयेन पश्चिमेन नगरद्वारेणोद्यानभूमिमभिनिष्क्रमन्महता व्यूहेन सोऽद्राक्षीत् पुरुषं मृतं कालगतं मञ्चे समारोपितं चैलवितानीकृतं ज्ञातिसङ्घपरिवृतं सर्व्वैरुदद्भिः क्रन्दद्भिः परिदेवमानैः प्रकीर्णकेशैः पांशुवकीर्णशिरोभिरुरांसि ताड़यद्भिरुत्क्रोशद्भिः पृष्ठतोऽनुगच्छद्भिः। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष मञ्चोपरिगृहीतो
उद्धूत केशनख पांशु शिरे क्षिपन्ति।
परिवारयित्व विहरन्युरस्ताड़यन्तो
नानाविलापवचनानि उदीरयन्तः॥"

सारथिराह।

"एषो हि देवपुरुषो मृतु जम्बुद्वीपे
न हि भूय मातृपितृ द्रक्ष्यति पुत्त्रदाराम्।
अपहाय भोगगृहमातृपितृमित्त्रज्ञातिसङ्घं
परलोक प्राप्तु न हि द्रक्ष्यति भूय ज्ञातिम्॥"

बोधिसत्त्व आह।

"धिग्यौवनेन जरया समभिद्रुतेन
आरोग्य धिग्विविधव्याधिपराहतेन।
धिग्जीवितेन पुरुषो न चिरस्थितेन
धिक्पण्डितस्य पुरुषस्य रतिप्रसङ्गैः॥
यदि जर न भवेया नैव व्याधिर्न मृत्यु-
स्तथपि च महद्दुःखं पञ्चस्कन्धं धरन्तो
किं पुन जरव्याधिर्मृत्यु नित्यानुबद्धाः
साधु प्रतिनिवर्त्य चिन्तयिष्ये प्रमोक्षम्॥

अथ खलु भिक्षवो बोधिसत्त्वः प्रतिनिवर्त्य तं रथवरं पुनरपि पुरं प्राविशत्॥ इति हि भिक्षवो बोधिसत्त्वस्यापरेण कालसमयेनोत्तरेण नगरद्वारेणोद्यानभूमिमभिनिष्क्रामतस्तैरेव देवपुत्त्रैर्बोधिसत्त्वस्यानुभावेनैव तस्मिन् मार्गे भिक्षुरभिनिर्म्मितोऽभूत्॥ अद्राक्षीद्बोधिसत्त्वस्तं भिक्षुं शान्तं दान्तं संयतं ब्रह्मचारिणमनतिक्षिप्तचक्षुर्युगमात्रप्रेक्षिणं प्रासादिकेनेर्य्यापथेन सम्पन्नं प्रासादिकेनाभिक्रमप्रतिक्रमेण सम्पन्नं प्रासादिकेनालोकितव्यवलोकितेन प्रासादिकेन सङ्घाटीपिण्डपात्रचीवरधारणेन मार्गे स्थितम्। दृष्ट्वा च पुनर्बोधिसत्त्वो जानन्नेव सारथिमिदमवोचत्।

"किं सारथे! पुरुष शान्त प्रशान्तचित्तो
नोत्क्षिप्तचक्षु व्रजति युगमात्रदर्शी।
काषायवस्त्रवसनो सुप्रशान्तचारी
पात्रं गृहीत्व न च उद्धत उन्नतो वा॥

सारथिराह।

एषो हि देवपुरुष इति भिक्षुनामा
अपहाय कामरतयः सुविनीतचारी।
प्रव्रज्यप्राप्तः शममात्मन एषमाणो
संरागद्वेषविगतो तिष्ठति पिण्डचर्य्या॥

बोधिसत्त्व आह।

साधु सुभाषितमिदं मम रोचते च
प्रव्रज्य नाम विदुभिः सततं प्रशस्ता।
हितमात्मनश्च परसत्त्वहितञ्च यत्र
सुखजीवितं सुमधुरममृतं फलञ्च॥"

इति ललितविस्तरे १४ अः।

ततः संक्षुब्धचित्तोऽसौ स्वकीयं शुद्धान्तं विवेश। दिवसेऽस्मिन् राहुलनामा पुत्त्रोऽस्य समजनि। राजा शुद्धोदनः स्वाङ्गजस्य भ्रमणवृत्तान्तं सर्व्वं निशम्यास्य सन्न्यासग्रहणं शङ्कमानः चतुर्षु नगरद्वारेषु सैनाव्यूहान् सन्निवेशयति स्म तस्य परिरक्षणार्थम्।

रतिरसाभिज्ञान् युवतिजनानन्तःपुरेषु बहुतरान् प्रेषयामास बोधिसत्त्वस्य प्रमोहनाय। अथागता रजनी, सिद्धार्थस्य तु चित्तं व्याकुलितमतीव गेहात् प्रव्रज्य भैक्ष्यग्रहणार्थम्। ततो नृत्यादिप्रमोदात् परं निद्रिताः सर्व्वा युवतीर्विलोक्य शयनात् शनैः शनैरुत्थितो व्यलोकयत्।

"तत्र काश्चिद्व्यपलष्टवस्त्राः काश्चिद्विधुतकेश्यः काश्चिद्विकीर्णाभरणाः काश्चिद्विभ्रष्टमुकुटाः काश्चिद्विष्टतैरंशैर्विगोपितगात्राः काश्चिद्विसंस्थितमुखाः काश्चिद्विपरिवर्त्तितनयनाः काश्चित् प्रस्रवन्त्यो लालाभिः काश्चिद्धसन्त्यः काश्चित् प्रहसन्त्यः काश्चित्प्रलपन्त्यः काश्चिद्दन्तान् कटकटायन्त्यः काश्चिद्विवर्णवदनाः काश्चिद्विसंस्थितरूपाः काश्चित् प्रलम्बितबाहवः काश्चिद्विक्षिप्तवदनाः काश्चिदुद्घाटितशीर्षाः काश्चिदवगुण्ठितशीर्षाः काश्चिद्विपरीतवर्त्तितमुखमण्डलाः काश्चित् प्रध्वस्तशरीराः काश्चिद्विभग्नगात्राः काश्चिन्निकुब्जाः खुरखुरायमाणाः काश्चिन्मृदङ्गमुपगुह्य परिवर्त्तितशीर्षशरीराः काश्चिद्वीणावल्लक्याद्यपरिगृह्यपाणयः काश्चिद्विशुद्दन्तैः कटकटायन्त्यः काश्चित् किम्पलनकुलसम्पताड़ावकर्षितवाद्यभाण्डाः काश्चिन्निमेषोन्मेषपरिवर्त्तनयनाः काश्चिद्विवृत्तास्या एवं नदिकृतं धरणीतलगतमन्तःपुरं निरीक्षमाणो बोधिसत्त्वः श्मशानसंज्ञामुत्पादयति स्म।" तत्रेदमुच्यते।

"तां दृष्ट्व उद्विग्न स लोकनाथः
करुणं विनिश्वस्य इदं जगाद।
अहो बता कृच्छ्रगता इमेयं
कथं रतिं विन्दति राक्षसीगणैः॥
अतिमोहतमावृते दुर्म्मति-
कामगुणैर्निगुंफसंज्ञिनः।
विहगपञ्जरगता यथा नहि
लभन्ति कदाचिद् विनिःसृतम्॥"

इति ललितविस्तरे। १५ अध्याये।

अतीतेऽथ निशीथे सिद्धार्थोऽश्वपालमाहूयाह "जरामरणपञ्जरनियतसत्त्वपरिमोचनस्य समयो ह्युपस्थितो मे।" अतएव ग्रहीष्यामि सन्न्यासम्। विस्मितोऽश्वपालोऽब्रवीत् राजपुत्त्रस्य ते सन्न्यासग्रहणमनुचितं न समर्थोऽसि सन्न्यासाश्रमस्य कष्टानि सोढुम्।